**अभ्यास कार्यपत्रकम् 2012-2013**
**संस्कृतम् – सम्प्रेषणात्मकम्,**
**कक्षा – दशमी**

**समयः – होरात्रयम्** **पूर्णाङ्काः – 90**

**निर्देशाः –(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति। – खण्डः (क)–अपठित–अवबोधनम् –10 अंकाः,**
**खण्डः (ख) रचनात्मकं कार्यम्– 15 अंकाः,**
**खण्डः (ग) अनुप्रयुक्तव्याकरणम् – 30 अंकाः,**
**खण्डः (घ) पठित–अवबोधनम् – 35 अंकाः,**
**(ii) सर्वे प्रश्नाः अनिवार्याः।** **(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।**
**(iv) प्रश्नसंख्या अवश्यं लेखनीया।** **(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।**

## खण्डः (क ) अपठित – अवबोधनम्

**1. अधोलिखितं अनुच्छेदं पठित्वा निर्देशानुसारं अनुच्छेदाधारितानां प्रश्नानाम् उत्तराणि लिखत– 10**

भारतीयेषु पुराणेषु सर्वदेवमयी गौरित्युद्घोषित मास्ते । माता तु उत्पन्नस्य बालकं त्रिवर्षपर्यन्तमेव दुग्धं पाययति तदनंतरं तु आजीवनं दुग्धं वयं गोरेव लभामहे ।अतएव गौः मानवसमाजस्य धात्री अस्ति ।अथर्ववेदे कथितमस्ति यत् गोमातुः शरीरे सर्वे देवाः निवसन्ति ।आर्यसमाजस्य जनकः स्वामी दयानंदः 'गौ करुणानिधिः' इत्यस्मिन् पुस्तिकायाम् गोमहत्वं व्यज्ञापयत् । गोदुग्धं अमृतमिव भवति सर्वे जानन्ति एव गोमूत्रे ''नाइड्रोक्स सल्फर, अमोनिया गैस , तॉबा ,लोहा, आदयः तत्वाः भवन्ति । गोमूत्रेण असाध्याः रोगाः नश्यन्ति । पंचगव्यैः (दुग्ध, घृत, दधि, गोमय, गोमूत्र ) बहूनि उपचाराणि भवन्ति । अद्यापि भारतीयाः सवेषु धार्मिककार्येषु गवामेव दानं कुर्वन्ति अतएव गौः भारतस्य महत्वपूर्णा सम्पत्तिर्वर्तते । तस्याः गोसम्पत्तेः सुरक्षा भारतीयानामस्माकमावश्यकं कर्तव्यं वर्तते । यतोहि वयं जानीमः एव –''गावो विश्वस्य मातरम् '' ।

**I. एकपदेन उत्तरत– 1X2=2**

(i) बहूनि उपचाराणि कैः भवन्ति ?

(ii) 'गौ करुणानिधिः' पुस्तिकायाम् गोमहत्वं कः व्यज्ञापयत् ?

**II. पूर्णवाक्येन उत्तरत– 1X2=2**

(i) अथर्ववेदे किं कथितम् अस्ति ?

(ii) भारतीयेषु पुराणेषु किम् उद्घोषितमास्ते

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1X4=4**

(i) गोमूत्रेण असाध्याः रोगाः नश्यन्ति ।अस्मिन् वाक्ये विशेषणपदम् किम् ?
(अ) गोमूत्रेण (ब) असाध्याः (स) रोगाः (द) नश्यन्ति

(ii) पुस्तिकायाम् पदे का विभक्तिः ?
(अ) द्वितीया (ब) तृतीया (स) सप्तमी (द) सम्बोधन

( iii ) 'निवसन्ति ' इति क्रियापदस्य किं कर्तृपदं अनुच्छेदे प्रयुक्तम् ?
(अ) अथर्ववेदे (ब) गोमातुः (स) शरीरे (द) देवाः

(iv) साध्याः इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?
(अ) असाध्यायाः (ब) असाध्याः (स) धात्री (द) गोमय,

**IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। 2**

## खण्डः 'ख '

**2. संगणककक्षायां प्रवेशं प्राप्तुं प्रधानाचार्यं प्रति लिखिते प्रार्थनापत्रे रिक्तस्थानानि उचितपदैः पूरयत। पत्रं पुनः उत्तरपुस्तिकायाम् लिखत्। 1/2X10=5**

देववाणी भवनम्
तिथिः ...............................

(1)................................... प्रधानाचार्यवर्याः
(2).............................................................,
सविनयं निवेदयामि यत् अहं (3)...................... कक्षायां 90 प्रतिशतअंकान् गृहीत्वा उत्तीर्णः जातः। अधुना अहं (4)................. प्रवेष्टुम् इच्छामि। गणितविषये तु (5).................. सर्वदा शतप्रतिशतम् (6).................गृह्यन्ते। अद्यत्वे सर्वेषु कार्येषु (7)................अनिवार्यम्। कृपया मह्म् (8)........................ प्रदाय (9)...................माम् अनुगृह्णन्तु ।
(10)...................................................

प्रार्थी
अ. ब. स.

| |
|---|
| **मान्याः, सधन्यवादः, आदरणीयाः, स्वीकृतिं, अंकाः, संगणककक्षायां, दशम, मया, संगणकम्, भवन्तः** |

**2. मंजूषायां प्रदत्त–शब्दानां सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत –** **2X5=10**




मंजूषा–

| |
|---|
| अत्याचाराणि, गमय, प्रणमति, सूर्योदयः, विकसन्ति, नाटकं, बालकाः, संस्कृतेन, छात्राः, गायतः, देशभक्तिः |

**अथवा**

**स्वविद्यालये भवता/भवत्या प्रथमवारं संस्कृतनाटकस्य मंचनं कृतम् । स्वमनोदशां वर्णयन् पंच वाक्यानि संस्कृतेन मंजूषापदसहायतया लिखतु ।**

**मंजूषा –**

| |
|---|
| मार्गदर्शनेन, चित्तं, व्याकुलं, कम्पेते, अतीव, साधु, आमविश्वासः, जागृतः, करतलध्वनिं, प्रसन्नौ, आदेशेन |

**खण्डः 'ग'**

**(अनुप्रयुक्तं व्याकरणम्)**

30 अङ्काः

**प्रश्न 1.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। 1×5=5

(i) एतत् कार्यं तु कुक्कुटोऽपि करोति।

(ii) उभौ + एव मित्रे आस्ताम्।

(iii) जगत्+नाथः सर्वान् रक्षति।

(iv) अयं शोकः

(v) आसीत् प्रच्छन्न भाग्यनागधेयः कः+चित् कुमारः।

**प्रश्न 2.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।

1×6=6

I प्रकृतिः सस्नेहं सर्वान पलयति।

(1) सखिभिः सह (2) स्नेहेन सहितम्

(3) तैलेन सह (4) घृतेन सह

II अये! कथं कथं श्रीकृष्णार्जुनौ युधिष्ठिरः च।

(1) श्रीकृष्णः च अर्जुनः च (2) श्रीकृष्णौ अर्जुनौ च

(3) श्रीकृष्णः अर्जुनौ च (4) श्रीकृष्णम् अर्जुनं च

III प्रचण्डज्वालः अग्निः सर्वत्र प्रसरति।

(1) प्रचण्डः ज्वालः च (2) प्रचण्डाः ज्वालाः यस्य सः

(3) प्रचण्डं ज्वालां (4) प्रचण्डाः ज्वालाः

IV बालः रथस्य पश्चात् धावति।

(1) अनुरथस्य (2) अनुरथम्

(3) अनुरथः (4) रथानु

V इच्छाम् अनतिक्रम्य कार्यं कुरु।

(1) यथा इच्छाम् (2) इच्छानुसारम्

(3) यथेच्छम् (4) यथा इच्छाम्

VI कृतभोजनः बालः विद्यालयं गच्छति।

(1) कृतम् भोजनम् (2) कृतं भोजनम् येन सः

(3) कृतं भोजनं येन सः (4) कृतस्य भोजनस्य

प्रश्न 3. (क) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत– 1/2×6=3

(i) निजगृहं भासमानं अवलोक्य तौ दम्पती आश्चर्येण परस्परम् अपश्यताम्।

(1) भास्+शानच् (2) भा+शानच्

(3) भास्+मानम् (4) भास्+मतुप्

(ii) न जाने कथं माम् न परिगणयन्तः जनाः चित्रवर्णम् अहिभुजं 'राष्ट्रपक्षी' इति मन्यन्ते।

(1) परिगणय + शतृ (2) परिगण्+शतृ

(3) परिगणयत्+ क्त (4) परि+गण्+शतृ

(iii) एषा मम पुत्र+ङीप् क्रीडति।

(1) पुत्रा (2) पुत्रीम्

(3) पुत्री (4) पुत्रीः

(iv) प्रकृतेः सुन्दरतायाः वर्णनम् कठिनम्।

(1) सुन्दर+तल् (2) सुन्दर+टाप्

(3) सुन्दरत+तल् (4) सुन्दरी+तल्

(v) स्वच्छ + तल् सर्वेभ्यः स्वास्थ्यदायिनी भवति।

(1) स्वच्छतल् (2) स्वच्छन्दता

(3) स्वच्छन्दताम् (4) स्वच्छता

(vi) छात्रान् अध्यापक+टाप् पाठयति।

(1) अध्यापकः (2) अध्यापिका

(3) अध्यापकाः (4) अध्यापकम्

प्रश्न 3 (ख)अधोलिखितवाक्ययोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत। 1×2=2

(1) गुरुं (सेव्+शानच्) .............. शिष्यः मोदते।

(2) गुरोः गुरुत्वम् अभिनन्दनीयम्।

प्रश्न 4. अधोलिखितवाक्येषु मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत।

1×5=5

(क) अहम् .................. दिल्लीनगरं गमिष्यामि।

(ख) अस्य याच्ञा वृथा ............ अस्तु।

(ग) नगरात् .............. एकः आश्रमः अस्ति।

(घ) बालाः ग्रामं ................ अगच्छन्।

(ङ) स:अत्र ............ आगमिष्यति?

मञ्जूषा–

| |
|---|
| बहिः, ह्यः, मा, किमर्थम्, श्वः |

प्रश्न 5. (क) प्रदत्तविकल्पेभ्यः उचितसंख्यापदैः चित्वा वाक्यानि पूरयत– 1×4=4

I कूपे ............. महिलाः तिष्ठन्ति।

(i) चत्वारि (ii) चत्वारः

(iii) चतस्रः (iv) चतसृः

II क्रीडाक्षेत्रे .............. बालकः क्रीडति।

(i) एकः (ii) एकम्

(iii) एका (iv) एकेन

III लतायाम् .............. पुष्पाणि विकसन्ति।

(i) तिस्त्रः (ii) त्रीणि

(iii) तिसृः (iv) त्रीन्

IV विद्यालये .................. बालौ पुरस्कारम् प्राप्तवन्तौ।

(i) द्वे (ii) द्वयोः

(iii) द्वौ (iv) द्वाभ्याम्

प्रश्न 5. (ख) उचितसंख्यापदेन रिक्तस्थानानि पूरयत। 1×2=2

(i) विद्यालये (51) ................ छात्राः संस्कृतं पठन्ति।

(ii) उद्याने (96) .................. वृक्षाः सन्ति।

प्रश्न 6.अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा अशुद्धपदं संशोध्य लिखत - 1×5=5

I वयम् स्वकार्याणि ध्यानेन <u>कुर्वः</u>।

(1) कुर्वन्ति (2) कुरुत

(3) कुरुत (4) कुर्मः

II ह्यः विद्यालये उत्सवः <u>भविष्यति</u>।

(1) अभवः (2) अभवत्

(3) भवेत् (4) भविष्यतः

III <u>सर्वे</u> बालिकाः क्रीडन्ति।

(1) सर्वाः (2) सर्वाणि

(3) सर्वाम् (4) सर्वा

IV कक्षायाम् सर्वे <u>छात्रः</u> पठन्ति।

(1) छात्रा (2) छात्राः

(3) छात्रे (4) छात्रैः

V अस्मिन् प्रदेशे द्वौ नद्यौ वहतः।

(1) द्वयोः (2) द्वाभ्याम्

(3) द्वे (4) द्वयो

## खण्डः घ

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत- 4 अंक

अथ पूर्वमित्रं दुष्ट्बुद्धिः प्रच्छन्नभाग्यस्य धनागमवृतान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि-खननसुयोगं विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच-अहो। विचित्रः स्वप्नो मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति। तच्छ्रु त्वा परद्रव्ये अनासक्ता सा न्यवेदयत्-नाथ! विरम अस्मात् लोभात्। दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थतरुमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान्।

I एकपदेन उत्तरत $\frac{1}{2} \times 2 = 1$

(क) पूर्वमित्रं दुष्टबुद्धिः कस्य धनागमवृतान्तं श्रुतवान्?

(ख) कः झटिति एव क्षेत्रं गतः?

II पूर्णवाक्येन उत्तरत $2 \times 1 = 2$

(i) परद्रव्ये अनासक्ता प्रच्छन्नभाग्यस्य पत्नी किम् न्यवेदयत् ?

III विकल्पेभ्यः उचितम् उत्तर चित्वा लिखत- $\frac{1}{2} \times 2 = 1$

(क) 'स्वप्नः' इति पदस्य किम् क्रियापदम्?

(1) मया (2) दृष्टः (3) विचित्रः (4) अहो

(ख) परेषाम् धने इति अर्थे किं पदं गद्यांशे प्रयुक्तम्?

(1) अश्वत्थतरुमूले (2) अस्मात् (3) परद्रव्ये (4) अनासक्ता

2. **अधोलिखितं पद्यांशं, पठित्वा प्रदत्त प्रश्नान् उत्तरत् –**

**(आ) पद्यांशं**

त्यक्त्वा धर्मप्रदां वाचं , परुषां यो अभ्युदीरयेत् ।
परित्यज्य फलं पक्वं , भुंक्ते अपक्वं विमूढधीः ।।

**प्रश्नाः –**

I. एकपदेन उत्तरत– **1/2X2=1**

(i) कीदृशीं वाचं न त्यजेत् ?
(ii) कीदृशीं वाचं न वदेत् ?

II. पूर्णवाक्येन उत्तरत– **2X1=2**

विमूढधीः किम् भुंक्ते ?

III. शुद्धम् उत्तरं चित्वा लिखत – **1/2X2=1**

(i) 'परुषाम्' अत्र का विभक्तिः ?

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) सप्तमी

(ii) 'त्यक्त्वा' इत्यत्र कः प्रत्ययः ?

(अ) ल्यप् (ब) क्त (स) क्त्वा (द) क्तवतु

प्रश्न 3.अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत — 4 अंक

भीमः – (युधिष्ठिरं प्रति) भ्रातः। द्रौणिं अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।

युधिष्ठिरः – गच्छ वत्स! विजयी भव! नकुलः तव सारथिः भवतु।

(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)

श्रीकृष्णः – भो धमराज। समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

युधिष्ठिरः – भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।

श्रीकृष्णः – वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरः नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

प्रश्नाः–

I. एकपदेन उत्तरत — ½×2=1

(क) कम् अनुगन्तुम् युधिष्ठिरः अनुमतिं यच्छेत्?

(ख) पितुः द्रोणात् प्राप्तं किम् नाम अस्त्रं द्रौणेः पार्श्वे विद्यते?

II. यदि ब्रह्मशिरः अस्त्रं प्रयुज्यते तर्हि किं स्यात्? — 1×2=2

विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–

III (क) प्रकृतिम् इति पदस्य विशेषणपदं किम्? — ½×2=1

(i) भवान् (ii) द्रौणेः (iii) चपलाम् (iv) जानाति

(ख) 'सः' इति पदं कस्मै प्रयुक्तम्?

(1) श्रीकृष्णाय (2) द्रौणपुत्राय (3) युधिष्ठिराय (4) भीमसेनाय

प्रश्न – 4.

**मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत।** ½x8=4

(क) वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते।

**अन्वयः** मन्त्री ____(i)____ धैर्यवान् सभायाम् ____(ii)____ अकातरः (अस्ति) सः ____(iii)____ केन अपि ____(iv)____ न परिभूयते।

(ख) पापिनाञ्च सदा दुःखं, सुखं वै पुण्यकर्मणाम्।
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्।

**अन्वयः** सदा ____(i)____ दुःखं ____(ii)____ च वै सुखम्। एवम् ____(iii)____ ज्ञात्वा ____(iv)____ समाचरेत्।

**मञ्जूषा**

| |
|---|
| पुण्यकर्मणाम्, परैः, साधुवृत्तिम्, वाक्पटुः, स्थिरतरम्, अपि, पापिनाम्, प्रकारेण |

प्रश्न – 5.

**रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 1x4=4

(i) काकः सुप्तान् प्रबोधयति।
(ii) मयूरस्य नृत्यं तु प्रकृतेः आराधना अस्ति।
(iii) मिथुनः विशिष्टः राजपशुः अस्ति।
(iv) पर्यटनविभागेन सूची प्रकाशिता।

प्रश्न – 6.

**अधोलिखितवाक्यानि घटनाक्रमानुसारम् लिखत –** ½x8=4

(i) मार्गे बालकैः समुपजातविवेकः प्रच्छन्नभाग्यः स्वगृहं प्रत्यागच्छत्।
(ii) सुवर्णपूरितकलशः प्रच्छन्नभाग्यस्य क्षेत्रे अस्ति इति श्रुत्वा दुष्टबुद्धिः तस्य क्षेत्रम् अगच्छत्।
(iii) सुवर्णकलशे सर्पं दृष्ट्वा स्वमित्रं सर्पेण मारयितुम् कलशं तस्य गृहे अक्षिपत्।
(iv) एकदा प्रच्छन्नभाग्यः दुष्टबुद्धिः च धनहरणाय ग्रामान्तरम् अगच्छताम्।
(v) कलशात् बहिः निर्गतः सर्पः दुष्टबुद्धिम् एव दष्टवान्।
(vi) गृहम् आगत्य प्रच्छन्नभाग्यः श्रमेण प्रभूतं धनम् अर्जितवान्।
(vii) क्षेत्रं गत्वा दुष्टबुद्धिः वृक्षमूलं खनित्वा सुवर्णकलशं लब्धवान्।
(viii) स्वमित्रस्य धनागमनस्य समाचारं प्राप्य दुष्टबुद्धिः चौर्यार्थं तस्य गृहम् अगच्छत्।

प्रश्न – 7. रेखांकित पदानां प्रसंगानुसारं अर्थं चित्वा लिखत् 1X4=4

(क) वास्तविकं चक्षुः ज्ञानं भवति ।

(अ) चर्मम् (ब) लोचनम् (स) चूर्णम् (द) कर्णम्

(क) ते कथं ईदृशं विज्ञानं ।

(अ) दृश्यमानम् (ब) एतत्प्रकारकं (स) चमत्कारपूर्णम् (द) अद्भुतम्

(क) अरुणस्य प्रदेशः एव अरुणाचलः ।

(अ) आजानोः (ब) शकस्य (स) सूर्यस्य (द) चन्द्रस्य

(क) परमहं अखण्डः शाश्वतः च ।

(अ) नित्यः (ब) बालवत् (स) शशकवत् (द) अजः